ISSN 2454-1230

सप्तदशोऽङ्कः, XVII Issue

जनवरी - जून, 2023

January - June, 2023

# शिक्षाप्रियदर्शिनी

अन्ताराष्ट्रिया समकक्षव्यक्ति-समीक्षिता

बहुभाषी-षाण्मासिक-शोधपत्रिका

# SHIKSHA PRIYADARSHINI

(An International Peer-Reviewed Multi-Lingual)

Half-Yearly Research Journal)

**मुख्यसंरक्षक:**

प्रो. श्रीनिवास वरखेडी

**संरक्षक:**

प्रो. राधागोविन्दत्रिपाठी

**प्रधानसम्पादक:**

प्रो. पवनकुमारः

**प्रबन्धसम्पादकौ**

प्रो. अंजूसेठः

प्रो अरुणकुमारमंगलः (अभिवक्ता)

# अनुक्रमणिका


सम्पादकीय

प्रबन्ध सम्पादकीय viii

संरक्षकवाक् ix

शिक्षाप्रियदर्शिनी के गत अंक- 16 की समीक्षा xi

संस्कृतालेखाः xii

1. सांख्ययोगदर्शनयोः कैवल्यस्यावधारणा
प्रो. मारकण्डेयनाथतिवारी 1

2. अष्टाध्याय्यां चकारविमर्शः
डॉ. भगतसिंह आर्यः 8

3. महाभारतान्तर्गत-उशीनरोपाख्यानम् - एकं परिशीलनम्
डा.बी.कामाक्षम्मा 15

4. शिक्षणप्रशिक्षणयोः सम्प्रत्ययः
डॉ. रमणमिश्रः 22

5. बृहत्त्रय्यां निहितानि शैक्षिकतत्त्वानि
सलिलकान्तः त्रिपाठी 26

6. हिरण्यगर्भनासदीयसूक्तयोः दर्शनिकविचारधाराः
अभिलाष महापात्र 35

7. पं.सम्पूर्णदत्तमिश्रनाटकेषु कीर्तिकामेश्वरः
डॉ. गेहप्रदीप शर्मा 46

8. आपदाप्रबन्धने छात्रशिक्षकाणां जागरूकता
विपिनकुमारशुक्ला 50

9. शब्दप्रमाणमन्यमानाम्अस्माकं कृते वेदादयः ग्रन्थानां कथं सदा आदरार्हाः? 55
डॉ कैलाश चन्द मीणा / डॉ. जगदीश प्रसाद जाटः

10. पुराणवाङ्मये काव्यत्वस्य मूल्याङ्कनम् 66
डॉ. राघवकुमारझाः

11. माध्यमिकस्तरे शैक्षिकोपलब्धेः तात्पर्यम् 71
गंगाधरपाण्डेयः

12. बहुभाषिकता 77
डॉ. सुनील कुमार शर्मा

13. शिक्षणविधियों में नवाचार 81
डॉ. नितिन कुमार जैन एवं डा. कमलादेवी सुयाल

14. बाल्यकिशोरावस्था में व्यक्तित्वविकास 88
डॉ. कृष्णकान्त तिवारी

**शिक्षाप्रियदर्शिनी**
(अन्ताराष्ट्रिया समकक्षव्यक्ति-समीक्षिता
बहुभाषीयशोधपत्रिका)
सप्तदशोऽङ्कः, जनवरी-जून, 2023
ISSN : 2454-1230

# सांख्ययोगदर्शनयोः कैवल्यस्यावधारणा

**प्रो. मारकण्डेय नाथ तिवारी**
दर्शन संकाय (सांख्य-योग विभाग)
श्री लाल बहादुर शास्त्री राष्ट्रिय संस्कृत विश्वविद्यालय (केन्द्रीयविश्वविद्यालय), नई दिल्ली

सांख्यमते पुरुषस्य कैवल्यं मोक्षः। कैवल्यं केवलस्य अवस्थितिः। केवलत्वं च प्रकृतिसंसर्गवियोगः। तथा हि प्रकृत्या असंसृष्टस्य सतः पुंसोऽवस्थितिः। इदमेव द्रष्टुः स्वरूपेण अवस्थानमुच्यते पुरुषो हि निर्सगतो नित्यचैतन्यरूपत्वेन द्रष्टा, तस्य स्वं रूपं प्रकृतिसंसर्गरहितत्त्वे सति चेतनत्वं तेनैतेन रूपेण पुरुषस्य अवस्थितिः कैवल्यम्। अयमभिप्रायः-

सांख्यनये जीवः पुरुषपदेन व्यपदेष्टुमर्हः पुरुषश्च आत्मा तथा च जीवात्मपुरुषशब्दाः समानार्थकाः। यः पुरुषः स एव आत्मा स एव जीवः। स चानन्तः विभुर्नित्यश्च न तत्र कार्यत्वं न वा कारणत्वं स हि अद्वैतवेदान्तिनां ब्रह्म इव सर्वथा निर्धर्मकः किन्तु न खलु तदिव एकोऽद्वितीयश्च अपि तु सांख्यनये तस्यानेकत्वं सुप्रसिद्धम्। यथोक्तमीश्वरकृष्णेन सांख्यकारिकायाम्-

**जन्ममरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च।**
**पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव ॥**

अस्यां कारिकायां जननस्य मरणस्य करणवर्गस्य च प्रतिनियमेन युगपत्प्रवृत्तिविरहेण त्रैगुण्यविपर्ययेण च पुरुषस्य बहुत्वं (अनेकत्वम्) बोधितम्। तत्र जननं नाम निकायविशिष्टाभिर- पूर्वाभिर्देहेन्द्रियमनोऽहंकारबुद्धिवेदनाभिः पुंसोऽभिसम्बन्ध इदमेव पुरुषस्य जन्म, न तु परिणामलक्षणं तदीयं जन्म तस्य कूटस्थनित्यत्वेन परिणामायोगात्। निकायो नाम देहादीनां भोगानुकूलोऽन्योन्यसंसर्गः। स च तत्तत्पुरुषीयभोगसम्पादकतत्तत्पुरुषीयबुद्धिगतादृष्टवेदनीय- धर्माधर्मप्रयुक्तः। अयम्भावः—

सांख्यनये पुरुषोऽकर्ता, तदीया बुद्धिः सत्त्वान्तःकरणादिनामभिर्व्यवह्रियमाणा महत्तत्त्वापरनाम्न्या मूलप्रकृतेराद्यपरिणामभूता सैव कर्त्री, तत्रैव धर्माधम तिष्ठतः, तौ धर्माधर्मौ भाविनो भोगस्य सम्पादनार्थं देहादीनि स्वरूपेणोऽभिव्यज्य तेषामन्योऽन्यसंसर्गं च सम्पाद्य तैः सह पुरुषस्य तादृशं संसर्गं प्रादुर्भावयतो यद्शात् तैर्मिलितै बुद्धौ उत्पाद्यमानं सुखदुःखादिकं पुरुषनिष्ठत्वेन प्रतीयते। सुखादीनां पुरुषगतत्त्वेन प्रतीतिरेव पुरुषगतो भोग इति व्यपदिश्यते।

एतच्च जननं प्रतिनियतम्, न हि कस्मिंश्चिदेकस्मिन् जायमाने सहैव सर्वे जायन्ते, न हि एकस्मिन् मृते सर्वेम्रियन्ते इति मरणमपि प्रतिनियतमेव। किन्तु कश्चित् कदाचिज्जायते कश्चिच्च कालान्तरे जायते। एवमेव कश्चित् कदाचिन् म्रियते कश्चिच्च कालान्तरे म्रियते। यदि पुरुष एक एव स्यात् एकस्यैव तस्य देहादिभिः सम्बन्धस्तस्य जन्म मन्येत तदा युगपदेव तस्य सर्वे देहादयो जायेरन्, सर्वैश्च तैरेकदैव पुरुषस्य अभिसम्बन्धो भवेत् परमित्थं न दृश्यते, भवति क्रमेण विभिन्नानां देहादिसंघातानां प्रादुर्भावः

राष्ट्रियसंस्कृतविश्वविद्यालयग्रन्थमाला - ३५८
ISSN - 2231-0452

# उत्कर्षदीपिका

# Utkarṣadīpikā

(महस्विनी-विशेषाङ्कः)

प्रधानसम्पादकः
आचार्यः गुळ्ळपल्लि श्रीरामकृष्णमूर्त्तिः



सम्पादकाः
आचार्यः कोराड सूर्यनारायणः
आचार्यः सतीशः के.एस्.
डॉ.उदयनहेगडे

राष्ट्रियसंस्कृतविश्वविद्यालयः
(केन्द्रीयविश्वविद्यालयः)
तिरुपतिः - ५१७ ५०७
२०२३

# उत्कर्षदीपिका

(महस्विनीविशेषाङ्कः - २०२३)

## शोधलेखानुक्रमः


| क्र.स. | विषयः | पुटाङ्कः |
|---|---|---|
| १. | **भारतीयज्ञानपरम्परायां निहितानि तत्त्वानि**<br>– प्रो.रामसलाहीद्विवेदी | 1 |
| २. | **कालिदासीयाः केचनापत्यप्रत्ययान्ताः**<br>– प्रो.जयकान्तसिंहशर्मा | 5 |
| ३. | **सांख्यदर्शने मोक्षस्यावधारणा**<br>– प्रो.सुजातात्रिपाठी | 15 |
| ४. | **ईश्वरस्वरूपमीमांसा**<br>– प्रो.मारकण्डेयनाथतिवारी | 21 |
| ५. | **विविधशास्त्रप्रयुक्तगुणपदार्थनिरूपणम्**<br>– डॉ. दयाल सिंह पंवार | 34 |
| ६. | **न्यायवैशेषिकशास्त्रे मनस्तत्त्वविचारः**<br>– प्रो. बिष्णुपदमहापात्रः | 38 |
| ७. | **शिक्षाशास्त्रे नवीनाः विचाराः**<br>– आचार्य. के. भरतभूषणः | 46 |
| ८. | **वैदिकदर्शनानां सृष्टिप्रक्रिया प्रामाण्यवादस्य सन्दर्भे**<br>– प्रो.प्रभाकरप्रसादः | 52 |
| ९. | **वैदिकवाङ्मये कालविज्ञानस्य विविधपक्षाः**<br>– प्रो. प्रेम कुमार शर्मा | 58 |
| १०. | **भारतीयजैनज्ञानपरंपरा**<br>– प्रो.अनेकांतकुमारजैनः | 67 |

**विद्वत्समीक्षिता मूल्याङ्किता च शोधपत्रिका (ISSN: 2231-0452), वर्षम् : २०२३**

# ईश्वरस्वरूपमीमांसा

**प्रो.मारकण्डेयनाथतिवारी** *

सांख्यशास्त्रमाहात्म्यं तु सर्वथा शास्त्रेषु निरूपितमस्ति। स्मृतिपुराणादिष्वपि कपिलादि सांख्याचार्याणां प्रशंसा दरीदृश्यते। परं सांख्याचार्या ईश्वरं नैवाङ्गीकुर्वन्ति, अत एवैतन्मतखण्डनेऽपि न भवत्याचार्याणां संकोचः। ये आचार्या ईश्वरं न स्वीकुर्वन्ति, ते परलोकमपि नाङ्गीकुर्वन्ति, अत एवेश्वरविरुद्धमतखण्डनमेवैतस्य निबन्धस्य परमं प्रयोजनम्। ईश्वरोपासनां विना नानाविधप्रपञ्चासत्यजालादुद्धारो भवितुं नैव शक्नोति। युक्त्या वेदस्य शास्त्रस्य च प्रामाण्यमत्र यथामति प्रस्तूयते।

ईश्वरस्यानेकत्वखण्डनार्थं न्यायवार्तिककार उद्योतकरः कथयति - ईश्वरस्यानेकत्वे किं बाधकम्? विरुद्धेच्छासम्पन्नस्येश्वरद्वयस्य सद्भावे कस्मिन्नपि एकस्मिन् वस्तुनि प्रवृत्तिर्न स्यात्। यथा कस्मिन् वस्तुनि इदं भवतु, इदं न भवतु, इदं समीचीनं भवतु, इदं समीचीनं न भवतु, एतादृशविरुद्धेच्छाद्वयस्यानुसारं किमपि कार्यं न भवितुमर्हति। एकमेव वस्त्वेकस्मिन् समये नूतनं पुरातनं च न भवितुमर्हति। उभयेश्वरेच्छा प्रतिहता भविष्यतीति उभावप्यनीश्वरौ स्याताम्। अप्रतिहतैश्वर्याभावे ईश्वरो न भवितुमर्हति । यस्य ऐश्वर्यमप्रतिहतं भवति, स अनीश्वरो भवति। उभयोर्यदीच्छया कार्यं भवेत्, स ईश्वरोऽन्यश्च अनीश्वरः स्यात्।

वाचस्पतिमिश्रो व्यासभाष्यव्याख्यानावसरे कथयति अनेकेश्वरस्वीकारेऽपि काचित् क्षतिर्नास्ति, यत ईश्वरे रागद्वेषौ न स्त इति परस्परविरुद्धेच्छा न भविष्यति। अत्रेदं विचारणीयम्- यदि सर्वेषु ईश्वरेषु एकविधैव इच्छा सदा भविष्यति, तदा एकेनैव ईश्वरेण कार्यं चलिष्यति, अनेकेश्वरस्वीकारस्य का आवश्यकता? एकस्य ईश्वरस्य इच्छयैव कार्यं भविष्यति। ईश्वरस्य नित्या ईशाना इति एक एव ईश्वरः।

ईश्वरस्यानेकत्वं यदि स्वीक्रियते, तदा ईश्वरगोष्ठी स्वीकरणीया स्यात्। ईश्वरस्यैकत्वं न सिद्ध्यति, तदेश्वर सिद्धिरेवासम्भवा। अस्मिन् प्रसङ्गे उद्द्योतकरस्य

* सांख्ययोगविभागः, श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली